# M.A. 2nd Semester Examination, 2025

## SANSKRIT

PAPER—SANS-203

*Full Marks* : 50

*Time* : 2 hours

सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

1. श्रीहर्षप्रणीतस्य नैषधचरितमहाकाव्यस्य प्रथमसर्गमाश्रित्य दमयन्त्याः नलं प्रति कीदृशः पूर्वरागः तत् सविस्तरं प्रस्तूयताम् । 10

*अथवा*

नैषधचरितमहाकाव्यस्य प्रथमसर्गोत्तरार्द्धे वर्णितस्य हिरण्यमयहंसस्य करुणविलापः उपवर्ण्यताम् ।

2. कयोश्चिद् द्वयो: व्याख्या कार्या — 5 × 2

(क) अमुष्य विद्या रसनाग्रनर्तकी
त्रयीव नीताङ्गगुणेन विस्तरम् ।
अगाहताष्टादशतां जिगीषया
नवद्वयद्वीपपृथग्जयश्रियाम् ।।

(ख) पदैश्चतुर्भि: सुकृते स्थिरीकृते
कृतेऽमुना के न तप: प्रपेदिरे ?
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्
दधावधर्मोऽपि कृशस्तपस्विताम् ।।

(ग) यथोह्यमान: खलु भोगभोजिना
प्रसह्य वैरोचनिजस्य पत्तनम् ।
विदर्भजाया मदनस्तथा मनो
नलावरुद्धं वयसैव वेशित: ।।

3. किं नाम दूत-काव्यम् ? दूतकाव्येषु मेघदूतस्य वैशिष्ट्यं प्रतिपाद्यताम् । 10

*अथवा*

मेघदूतमनुसृत्य उज्जयिन्या: सौन्दर्यं वर्ण्यताम् ।

4. कयोश्चिद् द्वयोः व्याख्या कार्या — 5 × 2

(क) प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी,
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै,
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ।।

(ख) वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।
विद्युद्दामस्फुरणचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽपि ।।

(ग) विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ।।

**[ Internal Assessment — 10 Marks ]**